संस्कृत-वार्ता:

05.09.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अद्य नवदिल्ल्यां द्वयशीति: अध्यापकेभ्य: चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य राष्ट्रिय-शिक्षक-पुरस्कारं प्रदास्यति।

· भारत-सिङ्गापुर्-देशयोः मध्ये स्वास्थ्य-चिकित्सा, शिक्षा-कौशल-विकास, डिजिटल-प्रौद्योगिकी, भारत-सिङ्गापुर् सेमिकण्डक्टर्-इकोसिस्टम्-साहकार्य इत्यादिषु क्षेत्रेषु सहकारार्थं चतुर्णां सहमति-पत्राणां आदानप्रदानम् अभवत्।

· हरियाणायां एकचरणीयविधानसभानिर्वाचनस्य, जम्मू-कश्मीरे तृतीयचरणस्य निर्वाचनस्य च अद्य अधिसूचनानिर्गमनेन सह नामाङ्कन-पञ्जीकरणम् अपि समारब्धम्।

· भारतीय-रिजर्व्-बेङ्क् इत्यस्य प्रमुख: शक्तिकान्त-दासः दृढीकृतवान् यत् भारतस्य आर्थिकवृद्धिः नैरन्तर्येण अग्रे वर्धते।

· पैरालिम्पिक क्रीडायां स्वर्ण-पदकविजेता लक्ष्य भेदकः हरबिन्दरसिंहः पूजा जत्यानश्च अद्य मिश्रितदलवर्गे आस्ट्रेलियादेशस्य अमाण्डा जेनिङ्ग्स टेमोन केंटन्-स्मिथ इत्येतौ पराजित्य प्रागुपान्त्यचक्रीय-क्रीडायां प्रवेशं कृतवन्तौ।

<u>राष्ट्रपति:-अध्यापका:</u>

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अद्य नवदिल्ल्यां द्वयशीति: अध्यापकेभ्य: चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य राष्ट्रिय-शिक्षक-पुरस्कारं प्रदास्यति। ध्यातव्यमस्ति यत् डॉ. सर्वपल्लीराधाकृष्णनवर्यस्य जयन्त्यवसरे प्रतिवर्षं सितम्बरमासस्य पञ्चमे दिनाङ्के राष्ट्रिय-शिक्षक-दिवस: परिपाल्यते। केन्द्रीय-शिक्षामन्त्रालयेन निगदितं यत् राष्ट्रिय-शिक्षक-पुरस्कारस्य उद्देश्यं देशस्य केषाञ्चित् शिक्षकाणाम् अद्वितीययोगदानस्य उत्सवाचरणम् अथ च तेभ्य: शिक्षकेभ्य: सम्मानप्रदानमस्ति। यै: न केवलं विद्यालयीयशिक्षाया: गुणवत्तायां परिमार्जनं कृतम् अपि तु बालानां जीवनमपि सुदृढीकृतम्। विद्यालय-शिक्षा-साक्षरता विभागेन अस्य वर्षस्य

राष्ट्रिय-शिक्षक-पुरस्काराय पञ्चाशत् शिक्षका: चिता:। एते शिक्षका: अष्टाविंशतिराज्येभ्य: त्रिभ्य: केन्द्रशासितप्रदेशेभ्य: षड्संस्थानेभ्यश्च समागता: सन्ति।

सिङ्गापुर्-भ्रमणम्-

भारत-सिङ्गापुर्-देशयोः मध्ये स्वास्थ्य-चिकित्सा, शिक्षा-कौशल-विकास, डिजिटल-प्रौद्योगिकी, भारत-सिङ्गापुर् सेमिकण्डक्टर्-इकोसिस्टम्-साहकार्य इत्यादिषु क्षेत्रेषु सहकारार्थं मन्त्रिस्तरीयाणां चतुर्णां सहमति-पत्राणां आदानप्रदानम् अभवत्। उभावपि देशौ स्वसम्बन्धान् समग्र-सामरिकसहभागित्वं प्रति वर्धयितुं सहमतौ अभवताम्, येन भारतस्य आक्ट्-ईस्ट्-इति नीतिः प्रमुखतया प्रवर्धिता भविष्यति। अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना तस्य सिङ्गापुर्-देशस्य समकक्षीयेन लारेन्स् वोङ्ग् इत्यनेन सह प्रतिनिधिस्तरीय-वार्तायाः अनन्तरं अयं निर्णयः कृतः। सिङ्गापुर्-नगरे वार्तालापकाले उभौ नेतारौ द्विपाक्षिकसम्बन्धानां प्रगतिं समीक्षितवन्तौ। आर्थिकसम्बन्धेषु प्रबलां प्रगतिं अवलोक्य उभयपक्षौ देशयोः मध्ये व्यापारस्य निवेशस्य च प्रवाहस्य विस्ताराय आह्वानम् अकुरुताम्। भारतीय-अर्थव्यवस्थायां प्रायः षष्ट्युत्तरैक शतकोटि-यु. एस्. डालर्-निवेशयुक्तः सिङ्गापुर्-देशः भारतस्य प्रमुखः आर्थिकसहभागीः अस्ति इति प्रधानमन्त्रिणा मोदी वर्येण अधोरेखितम्। सः इति अपि अकथयत् यत् भारतस्य द्रुता सुस्थिरा च वृद्धिः सिङ्गापुर्-देशस्य संस्थानां कृते निवेशस्य अपारान् अवसरान् उद्घाटयत् इति। ताभ्यां रक्षायाः सुरक्षायाः च क्षेत्रे विद्यमानसहयोगस्य, समुद्रीयक्षेत्रस्य अवबोधस्य, शिक्षायाः, नूतनप्रौद्योगिकीक्षेत्रस्य, विज्ञानप्रौद्योगिकीक्षेत्रस्य, ज्ञानसहभागित्वस्य च समीक्षा कृता।

विधानसभानिर्वाचनस्य अधिसूचना

हरियाणायां एकचरणीयविधानसभानिर्वाचनस्य, जम्मू-कश्मीरे तृतीयचरणस्य निर्वाचनस्य च अद्य अधिसूचनानिर्गमनेन सह नामाङ्कन-पञ्जीकरणम् अपि समारब्धम्। नामाङ्कनपूरणस्य अन्तिमा तिथिः अस्य मासस्य द्वादश दिनाङ्कः अस्ति, अग्रिमे दिने नामांकनपत्राणाम् अनुसंधेयकार्यं भविष्यति। हरियाणायां नामांकन प्रत्यावर्तनस्य अन्तिमा तिथिः सितम्बरमासस्य षोडश दिनाङ्को विद्यते। नवतिः सदस्यानां हरियाणाविधानसभायाः मतदानं अक्टोबर् मासस्य पञ्चमे दिनाङ्के भविष्यति। जम्मू-कश्मीरे नामांकन प्रत्यावर्तनस्य अन्तिमा तिथिः अस्य मासस्य सप्तदश दिनाङ्को वर्तते। अस्मिन् चरणे अक्टोबर्-मासस्य प्रथमे दिने चत्वारिंशत् निर्वाचनक्षेत्रेषु निर्वाचनं भविष्यति। इदानीं केन्द्रशासिते प्रदेशे द्वितीयचरणस्य विधानसभानिर्वाचनाय

नामाङ्कनं पञ्जीकरणं अद्य सायं अवसीयते। अस्मिन् चरणे षड्विंशतिः विधानसभाक्षेत्रेभ्य: सितम्बरमासस्य पञ्चविंशतिदिनाङ्के निर्वाचनं भविष्यति। हरियाणायाः जम्मू-कश्मीरस्य च त्रयाणामपि चरणानां एकचरणीयविधानसभानिर्वाचनस्य च मतगणना आगामिमासस्य अष्टमे दिनाङ्के भविष्यति।

<u>मुम्बई-भारतीय-रिजर्व्-बेङ्क्</u>

भारतीय-रिजर्व्-बेङ्क् इत्यस्य प्रमुख: शक्तिकान्त-दासः दृढीकृतवान् यत् भारतस्य आर्थिकवृद्धिः नैरन्तर्येण अग्रे वर्धते। सः अवदत् यत् केन्द्रीय-बैङ्क् इत्यस्य आगामिवित्तवर्षाय दशमलवद्वि-उत्तर-सप्तप्रतिशतस्य जीडीपी इत्यस्य वृद्धेः समाकलनम् यथार्थम् अस्ति।

<u>स्वच्छभारताभियानम्</u>

सर्वकारस्य प्रमुख-योजना स्वच्छभारताभियानम् इत्येषा देशे शिशु-मृत्यु-संख्यां न्यूनीकर्तुं साहाय्यं कृतवती। भारते योजनैषा परिवर्तनशीलां भूमिकां निरवहत्। स्वच्छभारत् मिशन् एण्ड् इन्फेण्ट मोर्टालिटी इन् इण्डिया इत्यस्य अन्तर्गतं शौचालयनिर्माणम् इति शीर्षकीये शोध-अध्ययने एतत् प्रकटितम्। अस्मिन् अध्ययने चतुर्दशोत्तरद्विसहस्रतमवर्षत: विंशत्युत्तरद्विसहस्रवर्षं यावत् काल: समाविष्ट:, यस्मिन् सर्वकार: दशकोट्यधिकान् गृहशौचालयान् निरमात्, तथा च उक्तवान् यत् त्र्यधिकद्विसहस्रतमे वर्षे देशस्य अधिकांशमण्डलेषु शिशु-मृत्युदर: प्रति सहस्रजीवितजन्मेषु षष्टित: अधिक: आसीत् इति। परन्तु विंशत्युत्तरद्विसहस्रतमे वर्षे अधिकांशेषु मण्डलेषु एतत् त्रिंशतित: न्यूनम् आसीत्। स्वस्य सामाजिक-माध्यम-मञ्चे एतत् अध्ययनं प्रसारयन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् शिशुमरणस्य न्यूनीकरणे समुचितशौचालय निर्माणं महत्वपूर्णां भूमिकां निर्वहति।

<u>जलप्लावितक्षेत्रेषु मन्त्रालयीयदलम्</u>

अद्य आन्ध्रप्रदेशस्य जलप्लावितेषु क्षेत्रेषु केन्द्रीयान्त: मन्त्रालयीयदलं यात्रायाम् अस्ति। केन्द्रीयगृहमन्त्रालयस्य आपत्प्रबन्धनस्य सचिवस्य संजीवकुमारजिन्दलस्य नेतृत्वे दलमिदं राज्ये सर्वत्र प्रचण्डवृष्ट्या जलप्रलयेन च व्यापकक्षतेः समाकलनं करिष्यति। आन्ध्रप्रदेशस्य तड़ेपल्लीनगरे आपत्प्रबन्धनप्राधिकरणस्य राज्याधिकारिभिः सह स्थितिविषये अन्वेषणं कर्तुं पूर्वं दलेन मुख्यालये समीक्षा एका सभा आयोजिता।

## शिक्षकदिवस:

शिक्षकदिवसस्य अवसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना शुभाशयाः प्रेषितानि। सामाजिक-माध्यम-लेखने श्रीमोदी अवदत् यत् एषः युव-मस्तिष्कं निर्मातृभ्यः सर्वेभ्यः शिक्षकानां प्रति कृतज्ञतां प्रकटितुम् अवसरः अस्ति इति। सः भारतस्य पूर्वराष्ट्रपतिनः डा. सर्वपल्ली राधाकृष्णन् इत्यस्य जन्मवार्षिकदिने अपि श्रद्धाञ्जलिम् अददात्, यस्योपलक्ष्ये शिक्षकदिवसः इति आचर्यते। प्रधानमन्त्रिणा अपि शिक्षकाणां कृते पत्रम् लिखितं यत् ज्ञानप्रदानं मार्गनिर्देशं च कृत्वा छात्राणां जीवनस्य निर्माणे तेषां भूमिका अतीव महत्त्वपूर्णा अस्ति इति। सः इत्यपि अकथयत् यत् छात्राणां व्यक्तिगतविकासेन सह, तान् देशस्य उत्तरदायिनः समर्थाः च नागरिकाः कर्तुं शिक्षकाणां भूमिका अतीव महत्त्वपूर्णा अस्ति। सः अवदत् यत् देशः छात्रान् शिक्षकान् च सङ्गृह्य शैक्षणिकपरिष्कारम् प्रति द्रुतगत्या अग्रे गच्छन् अस्ति, तथा च विकासस्य अस्मिन् मार्गे सर्वैः संसाधनैः शिक्षकाणाम् हस्तानि सुदृढानि भवन्ति। पारम्परिकज्ञानस्य आधुनिकशिक्षाव्यवस्थायाः च संयोगेन भारतं सम्पूर्णे विश्वे ज्ञानस्य उत्कृष्टकेन्द्ररूपेण उद्भूतम् अस्ति इति मोदी वर्यः अवदत्।

## पैरालिम्पिक क्रीडा

पैरालिम्पिक क्रीडायां स्वर्ण-पदकविजेता लक्ष्य भेदकः हरबिन्दरसिंहः पूजा जत्यानश्च अद्य मिश्रितदलवर्गे आस्ट्रेलियादेशस्य अमाण्डा जेनिङ्गस टेमोन केंटन्-स्मिथ इत्येतौ पराजित्य प्रागुपान्त्यचक्रीय-क्रीडायां प्रवेशं कृतवन्तौ।

।। इति वार्ताः।।